# Ramachandrastutih

# રામચન્દ્રસ્તુતિઃ

## Document Information

Text title : rAmachandrastutiH

File name : rAmachandrastutiH.itx

Category : raama

Location : doc_raama

Proofread by : PSA Easwaran psawaswaran at gmail.com

Description/comments : Edited by S. V. Radhakrishna Shastriji

Acknowledge-Permission: Mahaperiaval Trust

Latest update : May 13, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# રામચન્દ્રસ્તુતિઃ

વન્દામહે મહેશાનચણ્ડકોદણ્ડખણ્ડનમ્ ।
જાનકીહૃદયાનન્દચન્દનં રઘુનન્દનમ્ ॥ ૧॥

નમો રામપદામ્ભોજં રેણવો યત્ર સન્તતમ્ ।
કુર્વન્તિ કુમુદપ્રીતિમરણ્યગૃહમેધિનઃ ॥ ૨॥

સ્વર્ણેણાજિનશયનો યોજિતનયનો દશાસ્યદિગ્ભાગે ।
મુહુરવલોકિતચાપઃ કોઽપિ દુરાપઃ સ નીલિમા શરણમ્ ॥ ૩॥

અધિપઞ્ચવટીકુટીરવર્તિસ્ફુટિતેન્દીવરસુન્દરોરુમૂર્તિઃ ।
અપિ લક્ષ્મણલોચનૈકસખ્યં ભજત બ્રહ્મ સરોરુહાયતાક્ષમ્ ॥ ૪॥

કનકનિકષભાસા સીતયાઽઽલિઙ્ગિતાઙ્ગો
નવકુવલયદામશ્યામવર્ણાભિરામઃ ।
અભિનવ ઇવ વિદ્યુન્મણ્ડિતો મેઘખણ્ડઃ
શમયતુ મમ તાપં સર્વતો રામચન્દ્રઃ ॥ ૫॥

પરિણયવિધૌ ભઙ્ક્ત્વાનઙ્ગદ્વિષો ધનુરગ્રતો
જનકસુતયા દત્તાં કણ્ઠે સ્રજં હૃદિ ધારયન્ ।
કુસુમધનુષા પાશેનેવ પ્રસહ્ય વશીકૃતો
ઽવનતવદનો રામઃ પાયાત્ત્રપાવિનયાન્વિતઃ ॥ ૬॥

રામો રાજમણિઃ સદા વિજયતે, રામં રમેશં ભજે
રામેણાભિહતા નિશાચરચમૂઃ, રામાય તસ્મૈ નમઃ ।
રામાન્નાસ્તિ પરાયણં પરતરં રામસ્ય દાસોઽસ્મ્યહં
રામે ચિત્તલયઃ સદા ભવતુ મે ભો રામ મામુદ્ધર ॥ ૭॥

યો રામો ન જઘાન વક્ષસિ રણે તં રાવણં સાયકૈઃ
હૃદ્યસ્ય પ્રતિવાસરં વસતિ સા તસ્યા હ્યહં રાઘવઃ ।
મય્યાસ્તે ભુવનાવલી પરિવૃતા દ્વીપૈઃ સમં સપ્તભિઃ

સ શ્રેયો વિદધાતુ નસ્ત્રિભુવનત્રાણૈકચિન્તાપરઃ ॥ ૮॥

રાજ્યં યેન પટાન્તલગ્નતૃણવત્ત્યક્તં ગુરોરાજ્ઞયા
પાથેયં પરિગૃહ્ય કાર્મુકવરં ઘોરં વનં પ્રસ્થિતઃ ।
સ્વાધીનઃ શશિમૌલિચાપવિષયે પ્રાપ્તો ન વૈ વિક્રિયાં
પાયાદ્વઃ સ વિભીષણાગ્રજનિહા રામાભિધાનો હરિઃ ॥ ૯॥

કારુણ્યામૃતનીરમાશ્રિતજનશ્રીચાતકાનન્દદં
શાર્ઙ્ગાખણ્ડલચાપમમ્બુજભવાગ્નીન્દ્રાદિબર્હીષ્ટદમ્ ।
ચારુસ્મેરમુખોલ્લસજ્જનકજાસૌદામિનીશોભિતં
શ્રીરામામ્બુદમાશ્રયેઽખિલજગત્સંસારતાપાપહમ્ ॥ ૧૦॥

કૂર્મો મૂલવદાલવાલવદપાંરાશિર્લતાવદ્દિશો
મેઘાઃ પલ્લવવત્પ્રસૂનફલવન્નક્ષત્રસૂર્યેન્દવઃ ।
સ્વામિન્વ્યોમતરુઃ ક્રમે મમ કિયાઞ્છ્રુત્વેતિ ગાં મારુતેઃ
સીતાન્વેષણમાદિશન્દિશતુ વો રામઃ સલજ્જઃ શ્રિયમ્ ॥ ૧૧॥

એતૌ દ્વૌ દશકણ્ઠકણ્ઠકદલીકાન્તારકાન્તિચ્છિદૌ
વૈદેહીકુચકુમ્ભકુઙ્કુમરજઃ સાન્દ્રારુણાઙ્કાઙ્કિતૌ ।
લોકત્રાણવિધાનસાધુસવનપ્રારમ્ભયૂપૌ ભુજૌ
દેયાસ્તામુરુવિક્રમૌ રઘુપતેઃ શ્રેયાંસિ ભૂયાંસિ વઃ ॥ ૧૨॥

બાલક્રીડનમિન્દુશેખરધનુર્ભઙ્ગાવધિ પ્રહ્વતા
તાતે કાનનસેવનાવધિ કૃપા સુગ્રીવસખ્યાવધિ ।
આજ્ઞા વારિધિબન્ધનાવધિ યશો લઙ્કેશનાશાવધિ
શ્રીરામસ્ય પુનાતુ લોકવશતા જાનક્યુપેક્ષાવધિ ॥ ૧૩॥

કલ્યાણાનાં નિધાનં કલિમલમથનં પાવનં પાવનાનાં
પાથેયં યન્મુમુક્ષોઃ સપદિ પરપદપ્રાપ્તયે પ્રસ્થિતસ્ય ।
વિશ્રામસ્થાનમેકં કવિવરવચસાં જીવનં સજ્જનાનાં
બીજં ધર્મદ્રુમસ્ય પ્રભવતુ ભવતાં ભૂતયે રામનામ ॥ ૧૪॥

કલ્યાણોલ્લાસસીમા કલયતુ કુશલં કાલમેઘાભિરામા
કાચિત્સાકેતધામા ભવગહનગતિક્લાન્તહારિપ્રણામા ।
સૌન્દર્યહ્રીણકામા ધૃતજનકસુતાસાદરાપાઙ્ગધામા
દિક્ષુ પ્રખ્યાતભૂમા દિવિષદભિનુતા દેવતા રામનામા ॥ ૧૫॥

યોઽદ્ધા યોદ્ધાવધીત્તાન્સપદિ પલભુજઃ સમ્પરાયે પરા યે
યેનાયેનાશ્રિતાનાં સ્તુતિરવનમિતેશાનચાપેન ચાપે ।
લઙ્કાલઙ્કારહર્તા કકુભિ કકુભિ યઃ કાન્તયા સીતયાઽઽસીત્
ઊનો દૂનોઽથ હૃષ્ટઃ સ વિભુરવતુ વઃ સ્વઃસભાર્યઃ સભાર્યઃ ॥ ૧૬॥

ઋક્ષાણાં ભૂરિધામ્નાં શ્રિતમધિપતિના પ્રસ્ફુરદ્ભીમતારં
સ્ફારં નેત્રાનલેન પ્રસભનિયમિતોચ્ચાપમીનધ્વજેન ।
રામાયત્તં પુરારેઃ કુમુદશુચિ લસન્નીલસુગ્રીવમઙ્ગં
પ્લાવઙ્ગં વાપિ સૈન્યં દશવદનશિરશ્છેદહેતુ શ્રિયેઽસ્તુ ॥ ૧૭॥

યસ્તીર્થાનામુપાસ્ત્યા ગલિતમલભરં મન્યતે સ્મ સ્વમેવં
નાઙ્ગાસીજ્જઙ્ઘિરે યન્મમચરણરજઃપાદપૂતાન્યમૂનિ ।
પાદસ્પર્શેન કુર્વઞ્ઝટિતિ વિઘટિતગ્રાવભાવામહલ્યાં
કૌસલ્યાસૂનુરૂનં વ્યપનયતુ સ વઃ શ્રેયસા ચ શ્રિયા ચ ॥ ૧૮॥

ધ્યાયેદાજાનુબાહું ધૃતશરધનુષં બદ્ધપદ્માસનસ્થં
પીતં વાસો વસાનં નવકમલરુચા સ્પર્ધિનેત્રં પ્રસન્નમ્ ।
વામાઙ્કારૂઢસીતામુખકમલમિલલ્લોચનં નીરદાભં
નાનાલઙ્કારદીપ્તં દધતમુરુજટામણ્ડલં રામચન્દ્રમ્ ॥ ૧૯॥

ઇતિ રામચન્દ્રસ્તુતિઃ સમાપ્તા ।

Proofread by PSA Easwaran

*Ramachandrastutih*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*